[1]पुष्यः,[A] [2]स्वपोषं[B] रैपोषम्, गोपोषम् धान्यपोषम् वा पुष्यति। [3]गोपोषी।

(1028) " पुष पुष्टौ " (IX-क्र्यादिः-1529. अक. सेट्. पर.)

'धारणे पोषयेत्, पुष्टौ पुष्येत् पुष्णाति पोषति।' (श्लो. 171) इति देवः। पोषकः-षिका, पोषकः-षिका, पुपोषिषकः-पुपुषिषकः-षिका, पोपुषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकपोषतिवत् (1026) ज्ञेयानि। शतरि [4]पुष्णन्[C]-ती, इति रूपमिति विशेषः।

(1029) " पुष धारणे " (X-चुरादिः-1751. सक. सेट्. उभ.)

आस्वदीयः।

'धारणे पोषयेत्, पुष्टौ पुष्येत् पुष्णाति पोषति।' (श्लो. 171) इति देवः। पोषकः-षिका, पुपोषयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकतोलयतिवत् (757) ज्ञेयानि। [D]प्रपोषितः।

(1030) " पुष्प विकसने " (IV-दिवादिः-1122. अक. सेट्. पर.)

पुष्पकः-ष्पिका, पुष्पकः-ष्पिका, पुपुष्पिषकः-षिका, पोपुष्पकः-ष्पिका; पुष्पम्, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकजल्पतिवत् (592) ज्ञेयानि। शतरि—[5]पुष्यन्-न्ती, इति रूपमिति विशेषः।

---

1. 'पुष्यसिध्यौ नक्षत्रे' (3-1-116) इति नक्षत्रेऽभिधेये क्यप्। अन्यत्र पोष्यम् इति ण्यदेव। पुष्यन्त्यर्था अस्मिन् इति पुष्यः=नक्षत्रविशेषः।
2. 'स्वे पुषः' (3-4-40) इति णमुल्। 'स्वे' इति पर्यायाणामपि ग्रहणात् रैपोषम् इत्यादीनां साधुत्वम्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुलन्तस्यैव धातोरनुप्रयोगः।
3. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः।
4. 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः। 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः। णत्वम्।
5. 'दिवादिभ्यः—' (3-1-69) इति श्यन्प्रत्ययः।

A. 'महारथः पुष्यरथं रथाङ्गी क्षिप्रं क्षपानाथ इवाधिरूढः॥' शि. व. 3. 22.

B. 'प्रस्थापयत् पूगकृतान् स्वपोषं पुष्टान् प्रयत्नाद् दृढगात्रबन्धान्।' भ. का. 3.4.

C. 'पुष्णन् सतां प्रियमयं प्लुषिताङ्गरागः
पुष्णन् मुदं मृगदृशां रिपुधाम मुष्णन्।' धा. का. 3.12.

D. 'दोर्भ्यां ग्रासयतां प्रपोषितरुषां निर्दलनोद्योगिनां
तेषां विक्रमणैरपाटि पटिमा शिक्षाऽप्यपोटि स्फुटम्। धा. का. 3.43.